# Shri Ramachandra Vandana

# શ્રીરામચન્દ્રવન્દના

## Document Information

Text title : Ramachandra Vandana

File name : rAmachandravandanA.itx

Category : raama

Location : doc_raama

Author : Sankhadeep Das sankhadeepd04 at gmail.com

Transliterated by : Sankhadeep Das

Proofread by : Sankhadeep Das

Latest update : August 26. 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 15, 2023

*sanskritdocuments.org*

# શ્રીરામચન્દ્રવન્દના

॥ શ્રીસીતારામચન્દ્રપરબ્રહ્મણે નમઃ ॥

ધરિત્રિજાધરામ્બુજામૃતાશનીમધુવ્રતં
    તદાસ્યપૂર્ણશર્વરીશચન્દ્રિકાશયાજુષમ્ ।
મખાગ્નિગર્ભજાહૃદમ્બુજન્મસપ્તવાજિગં
    ભજામિ નિત્યસુન્દરં શશિન્કલાબ્દવિગ્રહમ્ ॥ ૧॥

જામદગ્ન્યદર્પશિઙ્ગજામદગ્ન્યશસ્ત્રકં
    નિર્જરેશદર્પતુઙ્ગનિર્જરેશ્વરાયુધમ્ ।
દિગ્રથાલયક્રતૂગ્રપિઙ્ગતસ્કરાચ્યુત-
    માનરાહુમુણ્ડહર્તૃહેતિરાજચક્રકમ્ ॥ ૨॥

વાતજાતજાતઘાતભૂતિભૂતલઙ્ગિની-
    પ્રેતકેતકેતતુઙ્ગપુઙ્ગવઙ્ગમઙ્ગલમ્ ।
વારિજન્મજન્મજન્મસુગ્રહારરાન્તક-
    હૃત્સરોવરેઽવલીલહંસબ્રહ્મણે નમઃ ॥ ૩॥

કલશશ્રુતિનીરદનાદમુખાસુરકુઞ્જરપઞ્ચમુખોગ્રરદમ્ ।
દયિતાક્ષપદાશ્મકુરૂપહરં હરભીહરણિં હરકાર્મુકહમ્ ॥ ૪॥

સ્યન્દનાઙ્ગપાણબાણપાણસેવનાર્થભૂ-
    લક્ષ્મણાભિધેયલક્ષ્મિમન્દિરસ્ય પૂર્વજમ્ ।
દત્તકૈકયીજમૂર્તિધારિનર્કપાદુકં
    શત્રુહન્તૃભાવગન્તૃવિઘ્નહન્તૃશંસિતમ્ ॥ ૫॥

પ્રજેશપૂર્વકીટશેષજીવમધ્યમાસનં
    પ્રચેતસાન્તરેઽતિભીતિદાતૃશલ્યપાણિનમ્ ।
પ્રફુલ્લપઙ્કસમ્ભવાભનીલલોલલોચનં
    પ્રમોદદાવરાસકર્તૃવારિવાહભં ભજે ॥ ૬॥

દિઙ્મુખાન્તસિદ્ધિયુદ્ધે ધારિતાતિભીષણ-
    તાણ્ડવાકૃતિઞ્ચ ઘૂર્ણનેત્રવન્તદિઙ્મુખમ્ ।
રાવણાભિધેયકાનનાન્તરત્નધાતમં
    જાનકીપ્રણીતદિગ્ધરઙ્ગનાયકં ભજે ॥ ૭॥

નિસ્સીમબ્રહ્માણ્ડજનિત્રીપાત્રીહર્ત્રીતિરોધાનકર્ત્ર્યાદિશક્તેઃ ।
સીરાક્રપુણ્યાગગર્ભોદ્ભૃતાહિર્બુધ્ન્યાર્ધગાયાઃ પ્રાણાધિકેષ્ટમ્ ॥ ૮॥

કશ્ચિદેકભક્તચિત્તસાગરોત્થિતં ત્વિદં
    રામચન્દ્રવન્દનેન્દિરાસહોદરં વરમ્ ।
દ્વૈતમોહજન્યબન્ધહારિ યસ્ય ચન્દ્રિકા
    હંસદર્શનં વિમાનરામભદ્રભારતીમ્ ॥ ૯॥

॥ પ્રાર્થના ॥

ભવભાનોસ્ત્રિતાપાંશુકૂલિતોઽહં રઘૂત્તમ ।
એવં જ્ઞાત્વાચલાજેશ કુરુ માં તવ સર્વદા ॥ ૧॥

મત્સમો માર્ગણઃ નાસ્તિ પ્રદાતા ત્વત્સમો ન હિ ।
રામાયં યાચકં દાતું તવ ભક્તિમહદ્ધનમ્ ॥ ૨॥

રાજા રામેતિ વિખ્યાતાહો ત્વં મચ્ચિત્તચોરક ।
હે મદ્ધૃદિકવાટઘ્ન તિષ્ઠસ્યેકાત્ર સર્વદા ॥ ૩॥

નમસ્સાકેતકેતાય જનનચક્રભઙ્ગિને ।
વૈદેહીસક્તચિત્તાય રામચન્દ્રાય તે નમઃ ॥ ૪॥

જનની જાનકી દેવી પિતા દેવો રઘૂત્તમઃ ।
બાન્ધવાઃ રામભક્તાશ્ચ સ્વદેશો ભુવનત્રયમ્ ॥ ૫॥

ઇતિ દાસોપાખ્ય-શઙ્ખદીપરચિતં શ્રીરામચન્દ્રવન્દના સમ્પૂર્ણમ્ ॥

॥ શ્રીસીતારામચન્દ્રપરબ્રહ્મણે નમઃ ॥

Composed and prepared by Sankhadeep Das sankhadeepd04 at gmail.com

pdf was typeset on September 15, 2023

Please send corrections to *sanskrit@cheerful.com*